# मथुरायात्रा

भगवान् श्रीकृष्णः गोकुले आसीत् । तदा अक्रूरः तत्र आगच्छति । सः वदति - " हे कृष्ण ! **भवान्** मथुराम् आगच्छतु । मातुलः कंसः आयुधपूजार्थम् आह्वयति " इति ।

अक्रूरः वदति " **भवन्तौ** सज्जौ भवताम् । अहं रथम् आनयामि " ।

सः रथम् आनयति । तदा गोपिकाः तत्र आगच्छन्ति । ताः कृष्णं वदन्ति " कृष्ण ! **भवान्** मथुरां मा गच्छतु । अत्र एव तिष्ठतु । अन्यथा अस्मान् अपि मथुरां नयतु " ।

कृष्णः वदति " **भवत्यः** अत्र एव भवन्तु । स्वकार्याणि कुर्वन्तु " । सः राधां वदति " **भवती** चिन्तां मा करोतु । अहं शीघ्रं प्रत्यागच्छामि " ।

गोपाः अपि तत्र आगच्छन्ति । तदा बलरामः तान् वदति " **भवन्तः** निश्चिन्ताः भवन्तु । स्वकर्तव्यानि निर्वहन्तु । आवां शीघ्रं प्रत्यागच्छावः " इति ।

यशोदां रोहिणीं च नमस्कृत्य तौ वदतः " **भवत्यौ** दुःखं मा कुरुताम् । आवां सुखेन प्रत्यागच्छावः " ।

ततः सर्वान् नमस्कृत्य तौ रथेन मथुरां गच्छतः ।

--------- 0 ---------